ये ज्योतिर्विद् कुलोत्पन्ना हन्तिमन्तोऽल्पबुद्धय ।
तदिमिमोयमारम्भ किमग्रास मनीषिणाम् ॥
गुरु श्रीमान् राम सततहरिनामप्रणयवान्
उपास्यो नामास्य सरसगणकोयस्य जनक
गुणानस्यैकैक प्रथयितुमलं किं पुनरय
वयाणां मन्नात सुकृतपरिपाकात् प्रमुदित ॥ ५ ॥
दोषदुष्टमिदमित्यवज्ञया त्यानुमिच्छत न जातु माधव
शैवल किम विहाय कबलं निर्मल किमु न पीयते जलम् ॥ ६ ॥
वाग्लाघवं तत्र धन्य यदन्यापेक्षमाचिपन् ।
स्वार्थव्यञ्जी ध्वनिवधा वाग्मिन सैव वाग्मिता ॥ ७ ॥
नव्यर्थमचोदितमन्यतत्वान्
न प्रायशोध्याहरणीयमस्ति ।
कात्स्न्येन शास्त्र विदशाचिंतोऽपि
वस्तु न शक्त किमय मनुष्य । ८ ॥

End. नास्ति ।

Colophon इति गौचितपावनजातीयशाण्डिल्यकुलमण्डनज्योतिर्वित्सरसात्मजरघुनाथकविकण्ठीरवविरचितायां मुहूर्तमालायां सक्रान्तिप्रकरण चतुर्थं ॥

विवरणम्—सरसदैवज्ञात्मजरघुनाथकविकण्ठीरवप्रणीतमुहूर्तमालाभिध शुभमुहूर्तादिनिरूपक ज्योतिर्निबन्धविशेष ।

No. 107. यात्राशुभाशुभग्रहपरीक्षा । *Yātrāśubhāśubhagraha parīkṣā* Substance, country made white paper, 8 × 4 inches Folia, 3 Lines, 3-11 *in a page* Character, *Nāgara* Date ? Appearance, old Verse Not correct Complete

A short work on the auspicious moments for undertaking a journey, by Garga

Beginning. श्रीगणेशाय नमः ।

अथ यात्रायां यद्वर्षांत् कालनिर्णयं शुभाशुभं चाह ।

तनुस्थाने यदा क्रूरो यात्राकाले प्रदीप्यते ।

रोगो हानिश्च मृत्युश्चेदर्थनाशं न संशयः ॥

बुधः शक्रो गुरुश्चैव शुक्रश्चैव फलदायकः ।

तनुस्थाने समाप्नोति लाभश्च मानमावत ॥ १ ॥

बुधश्च शौरी भृगुनन्दनस्तु.

प्रस्थानकाले च यदा द्वितीये ।

सुवर्णलाभश्च तुरङ्गलाभ

मानस्य सार्थोऽपि चतुर्दशे वा ॥ २ ॥

End. मज्जितं चोभितश्चैव क्षयितं गर्जितस्तथा ।

मुषितं चर्वितं मुक्ता मू...चैव चोत्पन्नम् ॥

Colophon. इति श्रीगर्गविरचिताकारे द्वादशभावफलानि । श्रीरस्तु

विषयः—यात्राफलनिरूपणं ज्योतिर्विषयविशेष ।

No. 108. यात्रायां होरावशेन शकुनविचारः । Yātrāyām horāvaśena Śakunavicārah

A treatise on omens at the time of undertaking journeys, complete in one page, containing seven lines Anonymous

यात्राविषयकार्ये ज्योतिर्विदां रहेन मदुर्दे ।

No. 109. योगिनीदशा वा दशाचिन्तामणिः । Yoginīdaśā or Daśācintāmaṇih Substance, country made white paper, 12 x 5 inches Folia, 14 Lines, 7-9 in a page Character, Nāgara Date, Samvat 1[illegible] Appearance, old Verse Not correct Complete

A short work treating of the effects of Yoginīs on human destiny, entitled Yoginīdaśā, composed in Śaka 1555, by Rājarāma, son of Kalyāṇa. Noticed by Dr. R. Mitra under the name of Daśācintāmaṇi in his *Notices of Sanskrit MSS.*, No. 2770. Peterson

in 6, 412, makes mention of a Yoginīdaśā from the Gaurījātaka. The codex under notice contains something additional about the Antardaśā, taken from the Śivoddāmara, by the same author, which is not to be found in the codex noticed by Dr. R. Mitra.

Beginning. श्रीगणेशाय नमः ।

अथ पिनाकिनयने संयोज्य वसुभिर्हरेत्
शिष्टेन योगिनी ज्ञेया मङ्गलाद्येन सङ्कटा ॥ १ ॥
अथ मङ्गला पिङ्गला धान्यका च
तथा भ्रामरी भद्रिका चोल्किका च
तथा सिद्धिका सङ्कटाख्या क्रिमात्
शिवाया मुखे योगिनीकल्पनायाः ॥

End. एवमुक्ता विरदा यामले ज्वालामुखी सदा ।
पुस्तकीया प्रयत्नेन न वक्तव्यं न संशय ॥ १०४ ॥
इदं रहस्यं परमं सुगोप्यं
यद्गुरूक्तविद्ययाभर्णि हि
अपवार्णीकस्य हिताय सम्यक्
राजर्षिणा तत् प्रकटीकृतं हि ॥ १०६ ॥
दशाविभागार्थं तत् कल्यायस्य चकार हि ।
इति पञ्चरोषिकावृत्ते राजर्षि शिव ॥ १०७ ॥

The additional part commences after this and consists of ten ślokas as quoted below—

अथान्तर्दशायां च रीतिं स्वर्णगा
इतो दिन सुख सौदिनाद्य ।
तत्र योगस्यानीऽन्तर्दशाना
शिवोऽद्दामरादीत्य राजर्षिणोक्त ॥ १०८ ॥
पूर्वे ० तत्र १४ मङ्गलायां ३० दिनादी
कुर्योदयाभिमन्त्र्याधीशा ।
महादशाया न नवोत्तवासा
अन्तर्दशामध्ये कलाद ददात् । १०९ ॥
एव क्रमेणैवशार भवन्ति
अथान्तर्दशायामपि मङ्गलाद्ये ।

चन्द्रदशायामुपमभवन्ति
स्वकीयवर्गेगणमीयमनन ॥ ११० ॥
चन्द्रदशाया दिवसविनिघ्ना
पृथक पृथक स्वैव महादशब्दे ।
षडवस्रिमक्तोपदशा दिनाद्या
ज्ञया सुधीभि श्रियामणीता ॥ १११ ॥

प्रकारान्तरमाह ।

चन्द्रदशाष्टयोगिन्यय समादिका ।
चधोपदशा मध्ये विदशा प्रवेशदिनानि पृथक ॥ ११२ ॥
०।० २६।४६ ४०।०।ख०सभे मगाघाषि २७ तकाअयी ४६ वै खवेदा ४०
दिनादिर्भैव प्रोक्त एव ॥ ११३ ।
महाब्दैमतोऽन्तर्दशाया प्रमाणन कृत्यात्
इदमपि द्वितीयादिगुणा भवटपदशा सदा ।
श्रीमद्गलायामनुरव माया
चीर्ण च सर्वोधितमगलादि ॥ ११४ ॥
मामान्य स्वम्य च वक्रिशाया
चैकादशाद्यो हि मया निरूक्ता ।
पवर्गस्य वर्णो यवर्गस्य यच
तृतीय स्वरा सप्तमी नादविन्दु ।
तत पिङ्गलि वैश्विविख्यातस्तम
प्रमीत्स्यत चर सन् ग्रकरण ॥

Colophon इति दशाचिन्तामणि समाप्त संवत् १८५० ज्येष्ठ शुक्र ॥

विवरणम्—कन्याणाममराजयिमग्दहीतयोगिनीदशाविषयकोऽय निबन्ध ॥

No 110 ज्योतिषरत्नमाला । Jyotiṣaratnamālā Substance country made white paper, 14 × 7 inches Folia 18 Lines 8 14 in a page Character Nagara Date ? *Appearance old and slightly* worm-eaten in parts. Verse Not correct. Complete

A treatise on astronomy and judicial astrology based on the maxims of Garga and complete in nineteen prakaraṇas or chapters

by Śrīpati Datta. It treats of years, lunar days, sidereal days, days of the week, *Yogas*, Karanas, Nakṣatras, *Muhūrttas*, *etc. etc.*, Noticed by Dr. R Mitra in his *Notices* of Sanskrit MSS., No. 1426.

Beginning. श्रीमते रामानुजाय नमः ॥

प्रभवविरतिमध्ये ज्ञानवन्धा नितान्तं
विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययाना
मनुमितमिह वन्दे भयहं कालमीशम् ॥
विलोक्य गर्गादिमुनिप्रणीतं
वराहलल्लादिकृतं च शास्त्रम् ।
दैवज्ञकण्ठाभरणार्थमेष
विरच्यते ज्योतिषरत्नमाला ॥ २ ॥
शकेन्द्रकालः पृथगाकृती १२ घ्नः
शशाङ्कनन्दाश्वियुगैः ४२१ समेतः ।
शराद्रिवस्विन्दुहृतः १८६ सलब्ध
षष्ठ्यांशयुक्ते प्रभवादयोऽब्दाः ॥ ३ ॥

End. इति ललितमुदारां निर्मलां रत्नमाला
मुदहरदधिकार्था सद्गुणां रत्नकोशात् ।
निजगुरुपदभक्तः श्रीपतिः शास्त्रदर्शी
चतुरगणककण्ठे राजतामुज्ज्वलश्रीः ॥ ११ ॥
सुवृत्तया श्रीपतिवर्द्धमानया
कण्ठस्थया ज्योतिषरत्नमालया
\+ + + + +
सभासु भव्या गणको विराजते ॥ १२ ॥
आतरयतनविघ्ननिर्मितं
शास्त्रमेतदिति मा वृथा त्यज ।
आगमोऽयमृषिभाषितार्थता
नात्र किमपि कीर्तितं मया ॥ * ॥

Colophon. इति श्रीपतिभट्टविरचितायां ज्योतिषरत्नमालायां सुरपतिशापकरणमेकोन-
नमविंशति ॥ ० ॥ ० ॥ १८ इति रत्नमाला समाप्ता ॥ *

पौषमासे सिते पक्षे सप्तम्यां शनिवासरे ।
भरणीसंज्ञके लिखितं पाठार्थं सुसानम् ॥

विवरणम्—श्रीपतिभट्टविरचितज्योतिषरत्नमालाभिधज्योतिर्निबन्धोऽयम् ।

No. 111. ज्योतिषरत्नमाला । *Jyotiṣaratnamālā* Substance, country made colourless paper, 12 x 5 inches Folia, 9 Lines, 6-11 in a page Character, Nagara Date, ? Appearance, very old, worn out and writing effaced in parts Verse Not correct Incomplete

Another incomplete copy of the same work.

विवरणमुक्तपूर्वम् ।

No. 112. रमलरहस्यम् । Ramalarahasyam Substance, country made white paper, 15 x 5 inches Folia, 511 Lines, 7 in a page Character, Nāgara Date, Samvat *1863* Appearance, not old, but slightly worm-eaten throughout. Verse and prose Not correct Complete

A work on Ramala, a science unfolding the mysteries of human fate, borrowed from the Arabian and Persian books on divination, entitled Ramalarahasya, complete in four prakaranas The first prakarana has *three chapters or adhyāyas, the second, twenty one, the* third, twelve, and the fourth, one by Bhayabhañjana Śarman

Beginning. श्रीगणेशाय नमः । श्रीनवग्रहेभ्यो नमः श्रीकालभैरवाय नमः । श्रीरमल सांप्रदायिकेभ्यो नमोनमः । श्रीगुरुभ्यो नमः । ओं

गङ्गाधरकरकमलसत्करदण्डयुग्मा
भालान्तरालसितभस्मधृतत्रिपुण्ड्रा ।
रुद्राक्षमण्डपविभावितदिव्यमूर्त्ति
श्रीरामदीक्षितगुरोर्मम सन्निधत्ताम् ॥ १ ॥
गणनाथं नमस्कृत्य मायनाथ गुरुं तथा ।
कुर्वे भास्करं प्रश्नं यत्र सात्त्विकं वदेत् ॥ २ ॥

रमलरहस्यं नामेदं शास्त्रं सारतरं ब्रुवे ।
लाभालाभं सुखं दुःखं जयश्चैव पराजयम् ॥ २ ॥
जीवनं मरणं गुह्यं मनोभिलषितं तथा ।
इतान्त सर्व्वजन्तूनां येन जानन्ति तद्विद ॥ ३ ॥

अथानुक्रमणिका अस्मिन् शास्त्रे सर्व्वाणि चत्वारि प्रकरणानि सन्ति । तत्र प्रथमं रमलदपिणामुत्पत्तिकथनं नाम तस्य त्रयोऽध्यायाः, द्वितीयप्रकरणं व्याख्यानरूपं तस्य चैकविंशत्यध्याया तृतीयप्रकरणं तन्वादिद्वादशभावानां प्रश्नकथनरूपं तस्य द्वादशाध्याया. चतुर्थं तु मिश्रप्रकरणं तस्य नानाविधैः स्फुटतरवस्तुभिरेकपञ्चाध्यायोऽस्ति । तत्र तावत् प्रथमप्रकरणस्य प्रथमाध्यायो व्याख्यायते ।

End.

यः कुत्रापि परिश्रमोऽयदि भवेत् पत्रे विशालं लहौ ।
शब्दे वापि कलाप विकारशीलमत्र्छाध्यता सादरात् ।
सद्यस्तिथिवर्शादिश१२खेचराद्या याष्टमेऽपि विगणं च क्रमात् ।
इचे सम हृत्यमर्भ च नामं सुगधी बदन्ति
श्रीमिद्वाद्दितकारतत्वनिरता श्वामावबोधात्सया
विघ्नविनिर्मन मावधाननसन्तिषाम् पादाकर्के ॥

Colophon.

इति श्रीमद्भवनशर्म्मकृतौ रमलरहस्ये सारसंग्रहे मिश्रप्रकरणं समाप्तं ॥ संवत् १८१६ । पत्रसंख्या ३१९ पौषशुद्ध पञ्चतिथौ ३ तद्दिने ग्रन्थः समाप्त. ॥ शुभम् ॥

विवरणम् — रमलरहस्याभिधप्रागभाद्दिमग्निरूपकज्योतिर्निबन्धविशेषः श्रीमद्भवनशर्म-विरचित आरब्यपारस्यज्योतिःशास्त्रमूलकोऽयं निबन्धः ।

No. 113. रमलशास्त्रम् । Ramalaśāstram Substance, country-made white paper, 11 × 5 inches. Folia, 29 . Lines, 11-12 in a page. Character, Nāgara. Date, Saṃvat 1816 Appearance, very old and slightly worm-eaten in parts Verse Not correct Complete.

A treatise on Ramala or finding out one's desired objects from questions, by the throw of dice, entitled Ramalaśāstra, by *Cintāmaṇi Daivajña* *From the last colophon in the codex, the work*

appears to be a part of the Prasnatantra, probably a more extensive work of the author on the same subject, so that it seems that the author might have been first treating the subject according to the Hindu method and afterwards added to it the Ramala, which has been taken from the Yavanasastras A work, Ramalacintâmani, by the same author is also mentioned in Cat Cat

Beginning. श्रीगणेशाय नमः ॥

गजास्यं सिन्दूरारुणितवदनं विघ्नदमनं
भक्ताभीष्टं स्वैर्नमितचरणं श्रीपकमलं ।
तथा देवीं वन्दे भुजगसुतदात्रीं त्रिभुवने
सुदीपं चक्रस्थं सकलदुरितौघार्द्दनभजे ॥ १ ॥
विलोक्य यावनं शास्त्रं रामलं प्रश्नसंग्रहान् ।
चिन्तामणिस्तनोत्येव रमलोत्कर्षमुत्तमम् ॥ २ ॥
सायने रुधरी दृष्टौ पाशान् धातुमयान्कुरु ।
अयने तेषु शून्यानि कर्त्तव्यानि यदादितम् ॥

End. अथ स्त्रियाः गर्भो विद्यते न वा ।
प्रथम वारिगेहे वा शुभे खण्डे यदा भवत् ।
वनिताया तदा गर्भो वर्त्तते नात्र संशय ॥ १ ॥
प्रथमं शुभखण्डं चेत् षष्ठ वा द्वादशीयवा ।
पुंनरक्तं तदा गर्भो व्यत्यये व्यत्यय वदत् ॥ २ ॥
अथ कश्चिद्गृहे वर्त्तते न वा ?
चतुर्थे खारिजे खण्डे गृहे नास्तीति संवदेत् ।
चतुर्थे दाखिले खण्डे वर्त्तते नात्र संशय ॥
द्वितीये पुनरक्तं चेद् द्रव्यमाश्रित्य तिष्ठति ।
षष्ठे रोगयुतो ज्ञेयो सप्तम स्त्रीयुतो भवत ॥
एवं सर्व्वेषु खण्डेषु पुनरुक्तिवशात् फलम् ।
तत स्थानभवं तेभ्यो रमल च विचक्षणे ॥ ३ ॥

Colophon. इति श्रीदैवज्ञचूडामणिश्रीमन्महाराजवन्दितपदाम्बुजश्रिष्टजनानन्ददायि सर्व्वविद्याकुशलसर्व्वशास्त्रज्ञतमश्रीमच्चिन्तामणिविरचितायां ज्योतिःशास्त्रे प्रश्नतन्त्रे रमलशास्त्रं सम्पूर्णं ॥ ॥ छ । संवत् १८१६ ॥ श्रावण कृष्ण ।

विवरणम्—श्रीमच्चिन्तामणिदैवज्ञविरचितप्रश्नतन्त्रान्तर्गतरमलशास्त्ररूपोऽयं निबन्धः ।

No. 114. रमलशास्त्रं । Ramalaśāstram. Substance, country-made colourless paper, 12 x 5 inches Folia, 20, (of which foll. 1—2 are wanting) Lines, 5-13 in a page. Character, Nāgara Date, ? Appearance, very old, worn out, writing slightly effaced in parts, and written by different hands Verse. Not correct Complete (except the first two folia)

Another copy of the above-mentioned work.

विवरणन्तुक्तपूर्व्वम् ।

No. 115. रसाला, नीलकण्ठीटीका Rasālā, Nilakanthītīkā. Substance, country made colourless paper, 13 x 6 inches Folia, 23 Lines, 11-13 in a page Character, Nāgara. Date, ? Appearance, very old, worn out, worm-eaten and torn in parts Prose Not correct. Incomplete

An incomplete copy of the commentary on Nilakantha's Tājika, entitled Rasālā, by Govinda, noticed in No 46

विवरणन्तुक्तपूर्व्वम् ।

No. 116. रेखागणितक्षेत्रव्यवहारः । Rekhāganita-ksetravyavahārah Substance, country-made white paper, 14 x 7 inches Folia, 258. Lines, 10 in a page, Character, Nagara Date, ? Appearance, not fresh Prose Not correct Incomplete

A Sanskrit translation of Euclid's elementary Geometry, by Pandita Samrāt Jagannātha, under the auspices of king Jayasimha of Jaypur. This work with fifteen chapters was completed in the early part of the 18th century (1730) and has been included in his voluminous work Samrāt Siddhānta. The codex under notice contains up to the end of the 4th chapter only, without figures, for which blanks are left. Noticed in the Catalogue of the India Office Library, No. 2882, p. 1023, and also in Catalogi Codicum Manuscriptorum Bibliothecae Bodleianae Pars Septima Codices Sanscriticos complectens confecit Th. Aufrecht, A M, No 797, p. 340.

Beginning. ॐसिद्धिः श्रीगणेशाय नमः ।

गजाननं गणाधिपं सुरासुरार्चितं सदा ।
समस्तभक्तकामदं शिवात्मजं सुखप्रदम् ।
विनष्टकष्टयोगिनो ममाशमचर्चितं
प्रणम्रभक्तिपूर्वकं भजामि विघ्नवारकं ॥ १ ॥
यच्छ्रीमूर्तिर्हरब्राह्मणसुरैर्नि
वन्द्यं समस्तजनमीडितवेदगम्यम् ।
वाग्देवतानिखिलमौक्तिकमौक्तिकश्रीं
वन्दे गुरुं गणितशास्त्रविशारदं च ॥ २ ॥
श्रीगोविन्दममरवादिविबुधान् ब्रह्मादबीजाङ्गिनान्
एतानेव निराकृतं गुणितमत्योभाव स्वभक्तानयन् ।
येनाहम् मानसदृप्तान् मनसा निर्जित्य भूमण्डले
श्रीमान्श्रीजयसिंहदेवनृपतिः श्रीराजराजेश्वर ॥
सर्व जनार्दन नाम दृष्टीभूय स्वतेजसा ।
भ्राजते ॰ महीपीठ यथा पैषो दिवाकरः ॥ ४ ॥
येनेष्टं वाजपेयाद्यैर्महादानानि षोडश ।
दत्तानि द्विजवर्येभ्यो गोग्रामगजवाजिनः ॥ ५ ॥
तस्य श्रीजयसिंहस्य तुष्ट्यै रचयति स्फुटम् ।
द्विजः सम्राट् जगन्नाथो रेखागणितमुत्तमम् ॥ ६ ॥
अपूर्वं विहितं शास्त्रं यत्र कोणावबोधनात् ।
क्षेत्रेषु जायते सम्यक् व्युत्पत्तिर्गणिते तथा ॥ ७ ॥
शिल्पशास्त्रमिदं प्रोक्तं ब्रह्मणा विश्वकर्मणे ।
पारम्पर्यवशादेतदागतं धरणीतले ॥ ८ ॥
तद्विच्छिन्नं महाराजजयसिंहाज्ञया पुनः ।
प्रकाशितं मया सम्यग्गणकानन्दहेतवे ॥ ९ ॥

अथ रेखागणितं । अत्र ग्रन्थे पञ्चदशाध्यायाः सन्ति अष्टसप्तोत्तरचतु शत प्रकरणानि सन्ति तत्र प्रथमाध्याये ऽष्टचत्वारिंशत्क्षेत्राणि तत्रादौ परिभाषाव्य. पदार्थ । दर्शनयोग्य विभागानर्हं स बिन्दुर्वाच्य ।

End. शान्ति ।

Colophon. चतुर्दशोऽध्याय । श्रीमद्राजाधिराजप्रभुवरजयसिंहस्य तु द्विजेन्द्रः श्रीमत्सम्राट् जगन्नाथ इति समभिधारूढेन प्रणीते ग्रन्थेऽस्मिन् रेखागणित इति सुकोणावबोध प्रदात्र्यध्यायोऽधीमीहार इहाविरति प्रापतुर्दशोऽगतोऽभत ॥

विवरणम्—सम्राट्पण्डितजगन्नाथानुदितयुक्लिड्कृतग्रन्थस्य रेखागणिताभिधोऽयं विषयः ।

No. 117. रेखागणितम् । Rekhāganitam. Substance, country-made white paper, 15 × 10 inches, bound like a book. Folia, 315. Lines, 5-19 in a page. Character, Nāgara. Date, Saṁvat 1878. Appearance, very old, worn out, torn and worm-eaten throughout, and writings injured in several places. Prose. Not correct. Complete.

A complete copy of the above-mentioned work.

End. तदा पञ्च समभुजकोणा अपि समाना भविष्यन्ति पञ्च समभुजदैर्घ्य चतुरस्रयः कोणा इष्टदैर्घ्य कोणाः स्युः तस्मात् इष्टदैर्घ्य कोणा अपि समाना भविष्यन्ति इदमस्माकमिष्टम् ॥ ७ ॥

Colophon. श्रीमद्राजाधिराजप्रभुवरजयसिंहस्य तुष्ट्यै द्विजेन्द्रः
श्रीमत्सम्राट् जगन्नाथ इति समभिधारूढितेन प्रणीते
ग्रन्थेऽस्मिन्नाम्नि रेखागणित सुकोणत्वबोधप्रदान
अध्यायोऽन्तमीदापद इह विरति धमसंख्योगतोऽभूत् १५ ।
समाप्तोऽयं ग्रन्थ शुभं भूयात् ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
भग्नपृष्ठकटिग्रीव ऊर्ध्वदृष्टिरधोमुखः ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥ १ ॥
संवत् १८७८ शाके मौनि पौषमासे कृष्णपक्षे द्वितीयायां भौमवासरे ।
शुभमस्तु ॥

विवरणमुक्तपूर्वम् ।

No. 118. उकराख्यग्रन्थः । Ukarākhyagranthaḥ. Substance, country made white paper, 10 × 7 inches, bound in book form. Folia, 54. Lines, 15–24 in a page. Character, Nāgara. Date, Saṁvat 1787; Śaka 1652. (Probably the date of Sanskrit translation.) Appearance, very old, worn out, and slightly worm-eaten in parts. Prose. Not correct. Complete.

A work which appears, from the figures given in illustration of its course, to be a treatise on spherical Geometry, entitled Ukarā-

grantha This was first composed in Yavānī or Greek language and translated into Arabic by several authors Kustavivilukā bālbhui had translated upto the fifth figure of the third chapter at the request of Abul Abbas Ahmed, and the remaining portion was translated by others whose names are not given Savita vimkusais corrected the work, and Narsir made a commentary on it Then Abid explained the Arabic text to Nayanasakha who translated it into Sanskrit in Samvat 1787

Beginning श्रीगणेशाय नमः ॥ अथ उकराख्यग्रन्थस्य सावजूसयूसकृतौ लिख्यते। तत्रास्य त्रयोऽध्याया एकोनषष्टि शुल्कानि ५९ क्षेत्राणि सन्ति परं च कश्चित् पुस्तकेऽष्टपञ्चाश ५८ न्मितान्येव क्षेत्राणि सन्ति तत्र प्रयोजनद्वयस्यैक क्षेत्रमेव कृतं। इदं यूनानी भाषातः अरबभाषायां अबुल अब्बास अहमद स्याज्ञया कुस्ताविविलुकाबाल्बक्कीनाम्ना तृतीयाध्यायस्य पञ्चमक्षेत्रपर्यन्त परिवर्तितं शेषमन्यैः परिवर्तितं इदं सावितविमिकुसीसनाम्ना शोधितं नरसीर नाम्ना च टीका कृता। सेयं संस्कृतभाषायां नयनसुखोपाध्यायेन बध्यते। अथ प्रथमाध्यायः। तत्र द्वाविंशति क्षेत्राणि सन्ति आदौ परिभाषा एक धरातलेन यत् क्षेत्रं तथा वेष्ट्यते यथा तदन्तर्गतमध्यदेशैकबिन्दोः सकाशात् सूत्राणि आवेष्टकधरातलपर्यन्तं सर्वाणि समानानि भवन्ति तस्य गोलक्षेत्र मिति संज्ञा कृतास्ति। तद्बिन्दु गोलस्य केन्द्रं भवति

End तस्मात् हवचाप कलचापस्य सजातीयं भविष्यति तस्मात् हवचाप कल चाप सजातीयस्य हतस्य चापात् अधिकं भविष्यति। पुनर्मतचाप दभ चापस्य सजातीयमस्ति। तस्मात् मतचापं दभचापसजातीयस्य हतस्य चापादधिकं भविष्यति इदमेवेष्टं। इदमारवीभाषातः आबिदसूनुना कथितं नयनसुखोपाध्यायेन संस्कृते रचितं

Colophon इत्युकरं सावजूस् यूस सस्य समाप्तं। अस्मिन् अध्यायत्रयम् एकोनषष्टि ५९ क्षेत्राणि सन्तीति सं १७८७ शाके १६५२ चैत्र वदि १ शनि समाप्तश्चायं ग्रन्थः। शुभं भूयात्॥

विवरणम्—निबन्धोऽयं श्रीनयनसुखोपाध्यायमारवीभाषातः संस्कृतेऽनूदित क्षेत्रतत्त्वविशदरूप

NOTE—In this codex we find attached another work containing a part of the Samrāṭ Siddhānta of Jagannātha of the following description—

सम्राट्सिद्धान्तः । Samrāṭ Siddhāntaḥ. Substance, country made colourless paper, 10×7 inches, bound in book form. Folia, 118. Lines, 20–27 in a page. Character, Nāgara. Date, ? Appearance, very old. *Prose. Not correct. Incomplete.*

An incomplete part of the Samrāṭ Siddhānta, by Paṇḍita Samrāṭ Jagannātha, a Paṇḍita in the court of Mahārāja Jaya Siṁha of Jaypur, treating of Hindu Astronomy.

Beginning. श्रीमद्गणपतये नमः । श्रीसरस्वत्यै नमः ॥

गजाननं गणाधिपं सुरासुरार्चितं सदा ।
समस्तभक्तकामदं शिवासुतं सुखप्रदम् ।
वितण्डखण्डयोगिनीसमाजमध्यवर्तिनम् ।
समस्तभूतिभूषितं नमामि विघ्नवारणम् ॥ १ ॥
लक्ष्मीन्द्रसिद्धचरणाम्बुरुहं सुरेशै
र्वन्द्यं समस्तजनसेवितरेणुगर्भं ।
वाग्देवतां निखिलभीहतमीपदन्तीं
वन्दे गुरुं गणितशास्त्रविशारदञ्च ॥ २ ॥
श्रीगोविन्दसमाह्वयादिविबुधान् ब्रह्माटवीनिर्गतान्
यत्नेनैव निराकुलं प्रथिमनोभावं स्वपक्षान्नयन् ।
म्लेच्छानमानसमुन्नतान् सततरसा निर्जित्य भूमण्डले
श्रीराजश्रीजयसिंहदेवनृपतिः श्रीराजराजेश्वरः ॥ ३ ॥
करं जनार्दन नाम दूरीकृत्य स्वतेजसा ।
भ्राजते दुःसहोऽरीणां यथा श्रीमद्दिवाकरः ॥ ४ ॥
राजाधिराजो जयसिंहदेवो
श्रीमत्समस्तदेशाधिपतिश्च सम्राट् ।
श्रीरामपादाम्बुजसक्तचित्तो
यज्वा सदादानरतः सुशीलः ॥ ५ ॥
श्रीलादिग्रन्थेषु नवीनयुक्ति
प्रचारदक्षो गणितागमज्ञ
सच्चरित्र. सत्परत कृपालु
स्निग्धप्रतापो जयति क्षमायाम् ॥ ६ ॥
दिनेष्टं वाजपेयाद्यैर्मखैर्दानानि षोडश ।
दत्तानि द्विजवर्येभ्यो श्रीरामविजयाश्रितः ॥ ७ ॥

स श्रमपाण्डीगणितप्रवीणान्
ज्योतिर्विदो गोलविचारदक्षान् ।
कारुञ्जयाह्वय चकार वेधम्
गोलादियन्त्रैर्दृढदाव भाजाम् ॥ ८ ॥
तेन श्रीजयसिंहेन मार्थित शास्त्रसंविदा ।
करोति श्रीजगन्नाथ सम्राट् सिद्धान्तमुत्तमम् ॥ ९ ॥
अथ वेधोपयोगीनि यन्त्राणि प्रोच्यन्ते ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पुस्तकेऽस्मिन् जयपुराधिपमहाराजश्रीजयसिंहसभापण्डितपण्डितसम्राट्जगन्नाथविरचितसम्राटसिद्धान्ताभिधग्रन्थविरचितनिबन्धस्य भारतीयज्योतिःशास्त्रसम्मतयन्त्रवेधयन्त्रादिनिरूपकोऽ प्रथमोऽसम्पूर्णो वर्त्तते ।

No. 119. सम्राट्सिद्धान्तं । Samrāt Siddhāntam Substance, country made yellowish paper, 10 × 7 inches Folia 288 Lines 14–23 in a page Character, Nāgara Date, ? Appearance, old Prose Not correct. Incomplete

This codex contains a Sanskrit translation of the Arabic work Almajest, by Paṇḍita Samrat Jagannātha, at the request of king Jayasimha, entitled Siddhantasarakaustubha It has been included in the Samrât Siddhânta This codex contains upto the end of the ninth prakarana of the thirteenth or the last chapter

Beginning. श्रीगणेशाय नमः ।

The first eight verses are as in the preceding No Then follow—

ग्रन्थं सिद्धान्तसम्राजं सम्राट् रचयति स्फुटम् ।
तुष्टेः श्रीजयसिंहस्य जगन्नाथाह्वय कविः ॥ ९ ॥
आरबीभाषया ग्रन्थो मिजस्ती नामकः स्थित ।
बालकानां सुबोधाय गीर्वाण्या प्रकटीकृत ॥ १० ॥

[illegible] अर्थशास्त्राख्या भवति । एकचत्वारिंशदधिकशतं प्रकरणानि [illegible] पञ्चदशैवाधि भवति । तत्र प्रथमाध्याये षड्विंशत्प्रकरणानि [illegible] भवति तत्र प्रथमप्रकरणं । लोके विद्याचतुष्टयमस्ति । एका [illegible] विद्या च । ज्ञानविद्या त्रिविधा एका सच्चिदानन्द- [illegible] । द्वितीया शुद्धा द्रष्टा च [illegible] [illegible] तृतीया च दृष्टा पाञ्चभौतिक ज्ञानकारिणी । व्यवहार विद्यापि त्रिविधा आचारव्यवहारप्रायश्चित्तरूपा । व्यवहारविद्या सुगमास्ति [illegible] तथापि [illegible], पुनः यथो- [illegible] पदार्थानां ज्ञानमस्ति । अतः [illegible] मध्या दत्ता ।

End. नास्ति ।

Colophon.

राजाधिराजप्रभुतांपदाधे
सम्राट् जगन्नाथकवि सुधिश्चो ।
सिद्धान्तसारे खलु कौस्तुभेऽस्मि-
न्नर्कप्रमाणोविरति क्रमेण ।

विवरणम्—निरन्वयोर्थं मजिस्टीअभिधयवनग्रन्थानुवादरूप, सिद्धान्तसारकौस्तुभाख्य, पण्डित-सम्राट्श्रीजगन्नाथकृतमहीयसम्राट्सिद्धान्तमस्ति. ।

No. 120. लग्नचन्द्रिका । Lagnacandrikā Substance, country-made reddish paper, 13 x 6 inches Folia, 46 Lines, 6–11 in a page Character, Nāgara Date, । Appearance, old, and slightly worm-eaten throughout Verse Not correct Complete.

An astrological treatise on the influence of planetary conjunctions on the destiny of man, and the most auspicious moments for marriage, etc., complete in four chapters, by Kāśinātha. Noticed by Dr. R. Mitra in his *Notices of Sanskrit MSS.*, No. 856. See also the Catalogue of the India Office Library, No. 3099, p. 1106.

Beginning. १ श्री । गणेशाय नमः ।

[illegible]
[illegible] ॥ १ ॥

सनु धनच भाता च सुतस्तुर्योरिपुस्त्रिय ।
मृत्युच धम्मकम्मायुर्व्यया भावा प्रकीर्त्तिता ॥ २ ॥
विषमोऽयसम पुंसौ क्रूरोऽक्रूरच नामत ।
चरस्थिरद्विस्वभावा मेषाद्याराशय क्रमा ॥ ३ ॥

End. परमोच्चफलमाह—
दशा मोक्ष मशी षाशे भौमोष्टादशमाशके ।
बुध पञ्चदशाशे च पञ्चमांशे वृहस्पति ॥
सप्तविंशाशके शुक्रोविंशत्यंशे शनैश्चर ।
सैंहिकेयच विंशांशे परमोच्चो निगद्यते ॥
परमांशाना फलमिदमथाधुना यत् पूर्व्वमुक्तम् ।

Colophon. (1) इति सर्व्वशास्त्रविशारद काशीनाथकर्त्ता लग्नचन्द्रिका समाप्ता । क्ष ॥ क्ष ॥

विवरणम्—श्रीकाशीनाथविरचितलग्नचन्द्रिकाभिधलग्नफलादिनिदर्शकोज्योतिर्निबन्धविशेष ।

No. 121. लघुचिन्तामणि । Laghucintamaṇih Substance, *country made reddish paper,* 9 × 4 inches. Folia, 4 Lines, 9 in a page. Character, Nāgara Date, ? Appearance, old, worn out, torn and writing injured in most parts Verse Not correct Incomplete

An abridgment of the author's own work, entitled Tithicintāmani or Vrihat Tithicintāmani, on auspicious lunar days, etc, by Ganesa.

Beginning. श्रीगणपतये नम ॥ श्रीगणपतिप्रसाद ॥
यश्चिन्तामणिरद्वलब्धमहुलीम्याल्क्रियो मतृकृते
तिथ्याद्यागमप्रदोऽस्य सुखिनो य स्तवने भीरव ।
तत्प्रीत्यै लघुमप्यकल्पममलं तिथ्यादिचिन्तामणिं
विश्वेशार्क्कसुखात् प्रणम्य कुरुत श्रीमद्गणेश कृती ॥ १ ॥
भगयुगमत् १४४०' शाक स्यात् सर्मांशोद्दतोऽर्यं
स्वरखख कुभि १००० यातो नागरख्याद्दय ८०० स्यात् ।

---

(1) The colophon in the codex noticed by Dr R Mitra reads इति श्रीकाशीनाथकर्त्ता लग्नचन्द्रिकायाचतुर्थ परिच्छेद समाप्त. ।

शुभश्च इह फल्गु वा्ञि ४१ दृश्पंयुक्त:
श्रुति ४ भिरिषुमसुद्रे ८४ मैं २० युंत: मनतः ॥

End. नास्ति ।

Colophon. नास्ति ।

· विवरणम्—श्रीगणेशविरचित स्फुटतिथिचिन्तामणिसंनिभतत्त्वचिन्तामणि नामकोऽयं ज्योतिर्निबन्ध विशेष ।

No. 122. लघुजातकम् । Laghujātakam Substance, country made white paper, 15 × 6 inches Folia, 10 Lines, 8–12 in a page Character, Nāgara Date, Samvat 1855 Appearance, old Verse Not correct Complete

A short manual of horoscopy, entitled Laghujātaka or Saṁksiptajātaka, by Varāhamihira. The text of the work has been published from the Berlin MSS. with a German translation by Dr. A. Weber. This work is an abridgment of the Vrihatjātaka. Noticed in the Catalogue of the India Office Library, No. 3057, p. 1094, and also by Dr. R. Mitra in his *Notices of* Sanskrit MSS., No. 812; also in Bik. No. 692, p 321. See also Die Handschriften verzeichnisse Koniglichen bibliothek zu Berlin Von A. Weber, No. 858, p. 256.

Beginning श्रीगणेशाय नमः ॥

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्र. स जयति धाम्नां निधि सूर्य ॥ १ ॥
होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि ।
यत् तस्याप्यार्याभि. सारमहं प्रवक्ष्यामि ॥ २ ॥
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मण प्राप्तिं ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥ ३ ॥
शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञानि ।
ऊरू च जानुजङ्घे चरणाविति राशयोऽजाद्या. ॥ ४ ॥
कालनरस्यावयवा पुरुषाणां चिन्तयेत् प्रसवकाले ।
सदसद्ग्रहसंयोगात् पुष्टान् सोपद्रवांश्चैव ॥ ५ ॥

End शैलामय विलग्न च होरा मंगकमिवच ।
पचकेष्वेव आमीयान्नष्टजातकमिद्रये ॥ ६ ॥
सम्कार मान्म मासा द्विगुणयाङ्गुले समायुक्ता ।
विषवकभक्ता शेषं मघर्ं तद्वनिशादि ॥ ७ ॥
द्विविघतुर्दंग्दशदशतिथिसप्तविगुणानवाष्टचन्द्राकौ ।
पञ्चदशघ्ना सदिशुखान्विताभवनिशादि ॥ ८ ॥

Colophon इति लघुजातके नष्टजातकाध्याय ॥ १६ ॥ संवत् १८४५ फाल्गुनमासे कृष्णपक्षे शिवचतुर्दश्यां शशाङ्क वासरे । राम ।

विवरणम्—लघुजातकाभिधवृहज्जातकसारभूतज्योतिर्निबन्धविशेष ।

No 123 लघुविनोदसारणी । Laghuvinodasāranī Substance country made white paper 13 × 6 inches Folia 78 Lines 9–11 in a page Mathematical figures Date ? Appearance very old, worn out and worm-eaten throughout Complete

This codex contains a Sārani only

पुस्तकेऽस्मिन् काचित् सारणिर्विद्यते

No 124 लघुसंग्रह । Laghusamgrahah Substance country made colourless paper 12 × 4 inches Folia 19 (of which foll 1—5 are wanting) Lines 8 in a page Character Nagara Date ? Appearance very old worn out torn worm-eaten and injured in parts Verse Not correct Incomplete

A primer on Astronomy and Astrology, by Laksminārāyana Noticed by Dr R Mitra in his Notices of Sanskrit MSS No 2875

Beginning. नास्ति ।

End नास्ति ।

Colophon इति लघुसंग्रह मतवप्रकरणम् ।

विवरणम्—श्रीलक्ष्मीनारायणविरचितप्रथमज्योतिःशिक्षोपयोगीनिबन्धविशेषो लघुसंग्रहो नाम ।

No. 125. **लीलावती।** Līlāvatī. Substance, country-made colourless paper, 12 × 5 inches. Folia, 14. Lines, 9–13 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten throughout, writing also injured in parts. Verse and prose. Not correct Incomplete.

Līlāvatī is the first part of the well-known mathematical work, Siddhāntaśiromani of Bhāskarācāryya, the son of Maheśvaropādhyāya, who completed his great work in 1075 Śaka (A D. 1150). It treats of arithmetic only, and has been published in Calcutta and Madras, and also translated into English by Mr. Colebrooke. There are also Hindi and Bengali translations of the work. Noticed in the Catalogue of the India Office Library, No. 2791, p. 1001.

Beginning. श्रीगणेशाय नमः।

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृत:
तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम्।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम्॥ १॥

End. नास्ति।

Colophon. नास्ति।

विवरणम्—श्रीभास्कराचार्य्यविरचित-सिद्धान्त-शिरोमणिनामक-प्रसिद्धनिबन्धीय-प्रथमांशभूत-पाटीगणितविषयकोऽयं निबन्धः सुप्रसिद्ध एव। निबन्धोऽयं कलिकातादिनगरे मुद्रितः प्रकाशं नीतश्च। निबन्धोऽयं हिन्दीवङ्गाङ्गलभाषास्वनूदितश्च।

No. 126. **लीलावती।** Līlāvatī. Substance, foolscap paper, 15 × 5 inches Folia, 55. Lines, 6 in a page. Character, Nāgara Date, ? Appearance, not fresh Verse and prose. Not correct. Complete.

This codex contains the complete text of Līlāvatī, noticed in the preceding No.

Beginning already given above.

End. न गुणो न हरो न कृतिर्न घन पृच्छास्तथापि दुष्टानाम् ।
गर्भितगणकानां स्यात् पातोऽवश्यमनुपातोऽस्मिन् । २६६ ।
येषां सुजातिगुणवर्गविभूषिताङ्गी
शुद्धाखिलव्यवहृति खलु कण्ठसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती
तेषां सदैव सुखसम्पदुपैति वृद्धिम् । ११०१० ।

Colophon. इति श्रीभास्कराचार्यविरचितायां लीलावत्यां सिद्धान्तशिरोमणौ प्रथमखण्ड सम्पूर्णं गणितपाठ्यां समाप्तश्चाङ्कपाशाधिकार ॥ ० ॥
अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ता संहिता
षट् तर्कान् गणितानि पञ्च चतुर्वेदानधी-त य ।
रत्नानां त्रितयं द्वयं च बुबुधे मीमांसयोरन्तर
सद्ब्रह्मैकमगाधबोधमहिमा सोऽस्या कविर्भास्कर ॥ १ ॥
लीलावत्यां छन्दसंख्या २०१ समाप्तोऽयं ग्रन्थ । लिपिकृत् तुलसीरामो ॥*

विवरणमुक्तपूर्व्वम् ।

No. 127. लीलावती । Lilāvati Substance, country made yellowish paper, 10 x 4 inches Folia, 16 Lines, 11–14 in a page Character, Nāgara. Date, ? Appearance, very old, and worn out Verse and prose Not correct Incomplete

Another incomplete copy of the same work

विवरणमुक्तपूर्व्वम् ।

No. 128. शीघ्रबोध । Śighrabodhah Substance, country made colourless paper, 12 x 5 inches Folia, 31 Lines, 9–10 in a page Character, Nagara Date, ? Appearance, old, and worn out Verse Not correct Incomplete

A treatise on astrology, complete in four Prakaranas, consisting of 507 slokas, by Kasinatha Bhattacarya Noticed in the Catalogue

of the India Office Library, No. 3015, p. 1071. See also Dr. Weber's *Berlin Catalogue*, No. 884, p. 266.

Beginning श्रीमहागणपतये नमः ॥

आमयन्त जगन्नाथं नत्वा भास्वन्तमव्ययम् ।
क्रियते काशीनाथेन शीघ्रबोधाय सद्वच. ॥ १ ॥
रोहिण्युत्तररेवत्यो मूलं स्वातिमृगोमघाः ।
अनुराधा च हस्तश्च विवाहे मङ्गलप्रदाः ॥ २ ॥

इति विवाहनक्षत्राणि ।

माघे धनवती कन्या फाल्गुने सुभगा भवेत् ।
वैशाखे च तथा ज्यैष्ठे पत्युरत्यन्तवल्लभा ॥ ३ ॥
आषाढे कुलहृद्धि स्यादन्ये मासाश्च वर्जिता. ॥
मार्गशीर्षमपोच्छन्ति विवाहे केऽपि कोविदाः ॥ ४ ॥

End. नास्ति ।

Colophon. इति काशीनाथकृते शीघ्रबोधे मुहूर्तप्रकरणं द्वितीयम् ॥ २ ॥

विवरणम्—श्रीकाशीनाथकृतशीघ्रबोधाभिधज्योतिःशास्त्रनिबन्धविशेष ।

No. 129. शुद्धिदीपिकाप्रभा । Śuddhidīpikāprabhā. Substance, *foolscap paper, 16 × 5 inches* Folia, 40 Lines, 3–8 in a page Character, Bengali Date, ? Appearance, not old Prose. Not correct. Incomplete

A commentary on the Śuddhidīpikā, entitled Prabhā, by Krisnācāryya. The codex contains up to the end of the fifth chapter.

Beginning. ओँ नमः सवित्रे ॥

प्रणम्यापारसंसारपारावारतरिं हरिम् ।
कृष्णाचार्य्यो वितनुते दीपिकायाः प्रभामिमाम् ॥

ग्रन्थारम्भे निर्व्विघ्नसमाप्तिकामाः सदाचारपरम्परानुमितवेदबोधितकर्त्तव्यताक मङ्गलमाचरन्ति । तदयमपि श्रीनिवासपण्डित ज्योतिःशास्त्राधिकृतस्य भगवतः श्रीसूर्य्यस्य सडोर्नमस्य कुर्व्वन्व्यापकत्वाभ्यामहतुयानुसन्नतोऽपि मङ्गलनिर्व्वाहार्थं क्रियमाणदीपिकाख्यग्रन्थादौ निबध्नाह—

जयति तरणि पूर्णौ यौ शुभाम् पातु तथासहाराभौधिलङ्घने तरणिर्यदि रप ।

End. शीघ्रगत्या स्वभोगकालातिक्रमणम् शीघ्रचार एवं विपरीतो वक्रगतिचाम् एव भुजे शौरस्तसुपगत च सतीचारौ न कुर्व्वीत इति दीपमाह ज्ञायत तरण भुवमिति तथातिचारेण गुरौ राज्यन्तरसञ्चरणपद दीपलिकौपचातेत्यादि पदयोकि तदितरयु सामान्यविशेषवचनेयु राज्यन्तरप्रमाणागुवादासदैव सरलोपलम्भादिति टौकाकारकृत । ० ॥

Colophon. इति श्रीकृष्णानन्दाचार्य्यविरचितायां शुद्धिदीपिकाटीकायां पञ्चमोऽध्याय ।०। ०।०॥०॥०।०।

विवरणम्—श्रीकृष्णानन्दाचार्य्यविरचितशुद्धिदीपिकाटीकाभूतप्रभाभिधनिबन्धोऽयम् ।

No 130 शुद्धिदीपिका । Suddhidipika. Substance, foolscap paper, 15 x 5 inches Folia, 37 Lines, 7-8 in a page Character, Bengali Date, Saka 1749 Appearance, almost fresh Verse Not correct Complete

An astrological work treating of auspicious and inauspicious days &c, entitled Suddhidipika complete in eight chapters by Srinivasa Noticed by Dr R. Mitra in his *Notices* of Sanskrit MSS, No 325 See Aufrecht's, Cat Bodl No 792, p 386, and also the Catalogue of the India Office Library, No 3007, p 1068

Beginning. ओं नम श्रीसूर्य्याय ॥

तथातरङ्गदुस्तरससाराम्भोधिलङ्घने तरणि ।
उदयवसुधाधराहयमुकुटमणि पातु वस्तरणि ॥
यस्य गलवति भिद्विदेशिमलिनदोषाकुल च गोविन्दे ।
तदाशादिशुद्धिसहपार्थं दीपिका क्रियते ॥
अफलान्यन्यशास्त्राणि विवादस्तषु केवलम् ।
सफल ज्योतिष शास्त्र चन्द्रार्कौ यत्र साक्षिणौ ॥

इति शास्त्रप्रशंसा ।

मुहूर्त्ततिथिनक्षत्रलग्नछायमानि च ।
सर्व्वाण्येवानुकल्पानि सुखं स्यात् साम्वत्सरो यदि ॥
इति दैवज्ञप्रशंसा ।

तमस्तोमावृते विश्वे जगदेतच्चराचरं ।
राशिग्रहोडुसंघातं सृजन् सूर्य्योऽभवत्तदा ॥

इति रव्याद्युत्पत्तिः ।

ततः प्रभृति जन्तूनां सदसत्कर्म्मसूचकः ।
होराख्यो वर्त्तते कालो ह्यहोरात्रोऽथ लौकिकः ॥

इति कालोत्पत्तिः ।

शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि ।
ऊरुजानुकजङ्घे चरणाविति राशयोऽजाद्याः ॥

इति अजादिराशिभिः कालस्याङ्गविभागः । मेषवृषमिथुनकर्कटसिंह-कन्यातुलावृश्चिक धनुश्च मकरकुम्भौ मीन इति राशयः कथिताः ॥

End. विबुधपितृपतिनरकालगुरुवड्गसिताङ्गवसूक्ष्मयमौ ।
रिपुरन्ध्रे संस्थपा नयन्ति चाक्षा विनिधनस्थाः (१) ॥
इति मृतदेवलोकादिगतिनिर्णयः ।

Colophon. इति महिन्तापनीयसत्पण्डितश्रीश्रीनिवासविरचितायां शुद्धिदीपिकायां यात्रानिर्णयो नामाष्टमोऽध्यायः समाप्तः ॥ ० ॥ ० ॥ ० ॥ शुभमस्तु शकाब्दाः १७४९ ॥ पौषस्य पञ्चविंशतिदिवसे चन्द्रवारे सितपक्षे एकादश्यां तिथौ वेला चतुर्थदण्डे समाप्तोऽयं ग्रन्थः ॥ ० ॥ ० ॥ यथा दृष्टं तथा लिखितं ॥ यत्नेन लिखितं ग्रन्थं यत्नतः परिपालयेत् ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

विवरणम्—श्रीश्रीनिवासपण्डितविरचितशुद्धिदीपिकाभिधशुभाशुभदिनादिनिरूपणज्योतिर्निबन्धविशेषः ।

---

(1) After this, the following verse is found in the codex noticed by Dr. R. Mitra.

सुविस्तरे ज्योतिषि यत्नतः कृतां
समस्तकर्म्मव्यवहारदर्शिकां ।
श्रीश्रीनिवासेन समाहृतामिमा-
ममत्सराः पश्यत शुद्धिदीपिकाम् ॥

This verse is also quoted and explained in the codex noticed below.

No. 131. शुद्धिदीपिकाटीका अर्थकौमुदी। Suddhidipikatika Arthakaumudi Substance, foolscap paper, 15 x 5 inches Folia, 106 Lines, 8 in a page Character, Bengali Date, ? Appearance, not fresh Prose Not correct Complete

A commentary on the Suddhidipika, entitled Arthakaumudi, by Govindânanda Kavikankana, son of Ganapati Bhatta Noticed in the Catalogue of the India Office Library, No 3010, p 1069

Beginning. ओं नमः श्रीसूर्याय।

श्रीगोमोहनमची रतिकलकण्ठीकण्ठ
ग्रवणकरीन्द्राननसुररिपुमुरलीध्वनिर्जयति।
जगति ख्यातगुणौघो हरिरवतीर्णः शत पृथिव्यां य।
श्रीमद्गणपतिभट्टो ज्योतिर्विद्यार्णवमार्त्तण्ड॥
कविकङ्कणपण्डित स्त्रिया सहितस्य सुतोऽर्थकौमुदीं।
तनुत किल शुद्धिदीपिकाखिलतत्त्वार्थविवेचनाविधिम्॥

ग्रन्थारम्भेऽभिमतसिद्धि याञ्छन्नयं श्रीमान् श्रीनिवासपण्डितो ज्योतिःशास्त्राधिकारित्व प्रज्ञाधिराज स्तुवन्नाह वृषेति।

End.

यस्माद् यद्यदतीतजन्मग्रहान स चेत्
तुङ्गी तदा तस्मिन् लोके श्रेय आसीत्।
तुङ्गभ्रष्टात् सुमित्रक्षेत्रस्थले सम
नीचशत्रुगृहस्थाने निकृष्ट इति॥

उपसंहारमाह सविस्तर इति।

इ समसुता श्रीश्रीनिवासपण्डितेन सर्व्वशास्त्रात् समाहृता शुद्धिदीपिका मिमां ग्रन्थत आनीत इत्यर्थः। सकलकर्मज्ञानहेतुत्वात्।

कविकङ्कणपण्डितेन यथाविहितेयं विषमार्थकौमुदी।
वचनामृतसारधारया गुणग्राह्या परिपिबन्तां बुधा॥
एतां शुद्धिविधानविषयिणीं श्रीदीपिका सर्व्वदा
भाष्यादिभिरित्तस्त प्रतिपन्नामालोक्य मूलान्विताम्॥
श्रीमत्तातपदारविन्दविलसद्भूलीभरोद्देशत
श्रीगोविन्दविपश्चिता विरचिताभनामनाक् कौतुकात्॥
कथा प्रसाद क्रियतां जगन्मङ्गले॥

Colophon. इति श्रीलश्रीगोविन्दानन्दकविकङ्कणाचार्य्यकृतायां शुद्धिदीपिकायामर्थकौमुद्यां यात्रादिनिर्णयो नामाष्टमोऽध्यायः॥०॥०॥

विवरणम्—श्रीगोविन्दानन्दकविकङ्कणविरचितार्थकौमुद्यभिधशुद्धिदीपिकाटीकाद्वयोऽयं निबन्धः।

No. 132. **शुद्धिदीपिकाटीकार्थकौमुदी।** Śuddhidīpikāṭīkārtha kaumudī. Substance, foolscap paper, 15 x 5 inches Folia, 128 Lines, 8 in a page. Character, Bengali Date, ? Appearance, almost fresh. Prose Not correct. Complete.

Another copy of the above mentioned work.

विवरणमुक्तपूर्वम्।

No. 133. **षट्पञ्चाशिका।** Satpañcāśikā

A little work consisting of fifty-six verses on various subjects This is a work of the Kāvya class, and would be noticed in our appendix. There is indeed an astrological work of the same name as noticed in our next number This identity in the name might have misled to its being placed among Jyotiṣa works.

No. 134. **षट्पञ्चाशिका सटीका।** Satpañcāśikā Saṭīkā. Substance, *country-made colourless paper,* 12 x 5 inches Folia, 17 Lines, 10–13 in a page Character, Nāgara Date, Samvat 1872, Śaka 1617 Appearance, old, worn out and torn in parts Verse and prose. Not correct. Complete

This codex contains Ṣatpañcāśikā, a little work consisting of *fifty-six verses, treating of foretelling one's fortunes from questions,* entitled Satpañcāśikā, by Pṛthuyaśas, son of Varāhamihira, with a commentary, entitled Ṣatpañcāśikāvivṛti, by Bhaṭṭotpala. The text has been noticed in the Catalogue of the India Office Library, No. 2992, p. 1058 B., in Weber's Berlin Cat, No. 257, *and in* Bik. Cat. No. 337, and the commentary in the Bik Cat. No 338

Beginning *of the Commentary* श्रीगणेशाय नमः ।

केशान्तार्कनिशाकरस्थितिजविज्ञानांशुजितमूर्ध्वजान्
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीञ्च वागीश्वरीम् ।
प्रश्नज्ञानविधौ वराहमिहिरस्यात्मस्य तदस्तुनि
लोकानां हितकाम्यया द्विजवरष्टीकां करोत्युत्पल ॥ १ ॥

कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते । शास्त्रादि विनि सृतमिदं वेदमिति सम्बन्धः । लग्नद्रेष्काणनवांशकादिना ग्रहस्थानव शेन च समागमजयपराजयलाभालाभहृतनष्टादिपरिज्ञानमभिधेयं सर्व्वत्र शुभाशुभकथनादिह लोके प्रसिद्धिरिह प्रयोजनं । किमभिधानैरित्येतत् प्रोच्यते ।

सिद्धिः श्रोतृप्रवृत्तीनां सम्बन्धकथनाद् यतः ।
तस्मात् सर्व्वेषु शास्त्रेषु सम्बन्धः पूर्व्वमुच्यते ॥
सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् केन न गृह्यते ॥

इति कस्यास्मिन् शास्त्रेऽधिकार उच्यते द्विजस्यैव ।

Beginning *of the Text*

प्रणिपत्य रविं मूर्द्ध्ना वराहमिहिरात्मजेन सद्यशसा ।
प्रश्ने कृतार्थगहनापरार्थमुद्दिश्य पृथुयशसा ॥ १ ॥
च्युतिर्विलग्नाद्धिबुकाच्च वृद्धि
र्मेष्यात् प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्य षष्ठे प्रश्नविलग्नकाला
षष्ठे प्रविष्टो हिबुके प्रवासी ॥ २ ॥

End *of the Text*

अथकाञ्छायते द्रव्य द्रेष्काणैस्तस्करा स्मृताः ।
राशिभ्य कालदिग्देशा वयो जातिश्च लग्नपात् ॥ ५६ ॥

End *of the Commentary.*

लग्नपाश्च लग्नस्वामिनयोरंश्य वय प्रमाणं जातिं च वदेत् । तथा च संहितायां

वयांसि तेषां तनया स्त्रबाल्यव्रतस्थिता यौवनमध्यवृद्धाः ।
भलोवृद्धा इति चन्द्रभौमज्ञगुरुशुक्रार्कशनैश्चराणाम् ॥

इत्येव चन्द्रमप्रवती शिष ।

÷

भौमे बुधे ब्रह्मचारी बाल्यतः । शनौ यौवनोपेतः स्थिरदर्शने वा शनिश्च दृष्टः । गुरौ मध्यमवयाः पञ्चाशदब्दः । सूर्ये वृद्धः सप्तत्यब्दः । सौरे तथैव वृद्धः सप्ततेरधिकवयेति अथवा प्रथमवयोऽभिव स्यात् पुरुषलिङ्गिति । जातिः ब्राह्मणादिः । शौर्यसितौ विप्राणां क्षत्रियाणां गुरुः । चन्द्रो विशां । शूद्राधिपतिर्बुधः शनैश्चरः संकरमवानामिति । जातिनिर्णयकाध्य इति ।

Colophon. इति श्रीभट्टोत्पलविरचितायां पञ्चाशिकाविवृतौ मिश्रकाध्यायः सम्पूर्णः । संवत् १८७९ शके १६६७ आश्विन शुद्धपञ्चम्यां भृगुवासरे लिखितं स्वार्थे परार्थे वा । श्रीविश्वेश्वराय नमः । लिखितं महाराष्ट्र काश्यां मध्ये ।

ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विन्दुभिः
पुंजन्म प्रवदेत् समांशकगतैर्युग्मेषु तैर्योषिता ।
गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियं
द्व्यंगस्था बुधवीक्षणाच्च यमलौ कुर्वन्ति पक्षे स्वके ॥ १ ॥

विषमराशौ पुरुषनवांशके लग्नार्कगुरवश्च यदि तदा पुंजन्मप्रदो भवति ।
एको योगः लग्नार्कगुरुचन्द्राः समराशौ समनवांशे तदा ।
योषितां जन्मेति द्वितीययोगः ।
गुरुसूर्यौ विषमे विषमराशौ च तदा पुंजन्मेति तृतीययोगः ॥
चन्द्रशुक्रभौमाः युग्मे समराशौ च तदा कन्याजन्मेति तुरीययोगः ।
गुरुसूर्यौ द्विस्वभावे बुधेन दृष्टौ पुत्रद्वयजन्म ।
चन्द्रशुक्रभौमाः द्विस्वभावे तदा कन्याद्वयजन्मेति षड् योगः ।
श्रीगोपीजनवल्लभाय नमः ॥

विवरणम् - पुस्तकेऽस्मिन् सटीकषट्पञ्चाशिकाभिधज्योतिर्निबन्धविशेषो वर्तते ।

No 135. षट्पञ्चाशिकाविवृतिः । Ṣaṭpañcāśikāvivṛitiḥ. Substance, country made white paper, 12 x 5 inches. Folia, 4. Lines, 13-15 in a page Character, Nāgara Date, 1724 Appearance, old, slightly worm-eaten throughout and torn in parts. Prose. Generally correct. Complete.

This contains only the commentary of Bhaṭṭotpala, entitled Ṣaṭpañcāśikāvivṛiti, as noticed above.

विवरणम्—पुस्तकेऽस्मिन् श्रीभट्टोत्पलकृतषट्पञ्चाशिकाटीकामात्रं वर्तते ॥

No. 136. षष्टिसंवत्सरप्रकरणम् । *Ṣaṣṭisaṃvatsara Prakaraṇam* Substance, country made white paper, 12 × 6 inches Folia, 24 Lines, 9–15 in a page Character, Nagara Date, Samvat 1833 Appearance, old, and worm-eaten in parts *Verse Not correct Complete*

A work describing the effects of sixty years, twenty of Brahmā, twenty of Viṣṇu and twenty of Rudra, in the form of a dialogue between Mahadeva and Pārvati, entitled Ṣaṣṭisaṃvatsara Prakaraṇa Anonymous

Beginning. श्रीगणेशाय नमः ॥ अथ साटिका लिख्यति (?) ॥ पार्व्वत्यै नमः ॥

अथातः संप्रवक्ष्यामि यथोक्तं शिवभाषितम् ।
यत विज्ञातमात्रेण साटिक गुण कथ्यते ॥
पार्व्वत्युवाच ।
देवदेव महादेव शृणु त्वं परितापन ।
अहं पृच्छामि यत् त्वां च षष्टिवर्षशुभाशुभम् ॥
देवदेव जगन्नाथ भुवनेश मम प्रभो ।
स समायै कथ्यते शुभाशुभा च वत्सर (?) ॥
कथित पृथिवीशत्व व्यातिषां ज्योतिकमम् ।
गूढार्थगोपना विद्या तथा कथ्य मम प्रभ ॥
ईश्वर उवाच ।
यदि पृच्छसि मां देवि चिरार्थिं पर्विवत्सरा ।
तदहं संप्रवक्ष्यामि भवत्यै नाव संशय ॥

End. क्वचित् स्वस्था । क्वचिदभय अन्यथा चैव चाप्यत । एतत् परतरं लोके सौख्यम् । इति द्वयफलम । दन्दुभिस्वादिवत्साम्न वर्षा युग द्वादशं ॥ १ ॥ द्वादशयुगवर्षोद्देश ॥

Colophon. इति ब्रह्मविंशतिक २० विष्णुविंशतिक २० रुद्रविंशतिक २० वर्षे षष्ट्यब्द फलं समाप्त । समाकलषष्ट्युवाच्यं समाप्तम् । शुभमस्तु ।

मासि मासि भवद्युद्ध दुर्भिक्षरोगविभ्रमा ॥
यो यस्य भवती स्वामी तत् सर्व्वं ज्ञायत (?) ॥
आदौ मज्जनचीरहारतिलकं नेत्राञ्जनं कुण्डलं
नासामौक्तिककुसुमं स्फार यानं वरं नेत्रे (?) ।
चन्दनमवनं सुकमति क्षुद्रावलीघण्टिकाम् ।
ताम्बूलं करकङ्कणे चतुरता शृङ्गारभूषो दश ॥

दर्पणंच परं प्रोक्तं प्रथमं भूषणं शुभे।
शीलमेव द्वितीयं स्यात् तृतीयं धार्मिमेव च।
औदार्य्यन्तु चतुर्थं स्यात् पञ्चमं पुष्पमुत्तमं।
मधुरत्वं तथा षष्ठ सूद्रत्वं (?) सप्तमं मतम्।
अष्टमञ्च पतिभक्तिः शुश्रूषा नवमं तथा।
सहिष्णुता च दशमं रतिरेकादशं तथा।
पतिव्रतं च विप्रेन्द्र द्वादशाभरणं स्त्रिय (?)। शुभमस्तु
यादृश पुस्तकं दृष्ट तादृशं लिखितं मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥

सम्वत्सर १८१२। लिखितं कृपानरामब्राह्मण काशीक्षेत्रे गङ्गातटे विश्वेश्वरसमीपे मानमन्दिरमध्ये सोमेश्वरसन्निधौ नारदेश्वरसन्निधौ॥ रामचन्द्राय॥

विवरणम्—षष्टिसम्वत्सरफलकथनविषयकोऽयं निबन्धः।

No. 137. सत्कृत्यमुक्तावली। Satkrityamuktāvali Substance, country-made yellow paper, 10 × 4 inches Folia, 14 Lines, 6 in a page. Character, Bengali Date, ? Appearance, old, and writing effaced in most parts Verse Not correct. Incomplete.

A compilation of all the leading facts regarding astronomy and astrology and the performance of auspicious domestic rites such as marriage etc., entitled Satkrityamuktāvali, by Raghunātha Sārvabhauma Bhaṭṭācāryya, noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS, No 1664. Two MSS. of this work are to be found in the Library of the Asiatic Society, Bengal, Calcutta. This codex has been printed.

Beginning. श्रीगणेशाय नमः।

नत्वा मातृगणेशमच्युतगिरिशं श्यामां सुशीलां मतं
ज्योतिःसदृशसंहितार्थमथधर्मशास्त्रं रत्नाकरं च।
सारं तेषु निगूढमाहृतवता प्रज्ञावतामाज्ञया
संचिता रघुनाथेन रचिता सत्कृत्यमुक्तावली॥१॥

End.

शनिचक्रं नराकारं लिखित्वा सौरिभावितः ।
नाम ऋक्षं भवेद्यत्र फलं तत्र शुभाशुभम् ॥
एकं मुखे दक्षहस्ते चत्वारि षट् पदद्वये ।
हृदि पञ्च करे वामे चत्वारि मस्तके त्रयम् ॥
द्वयं नेत्रद्वये गुह्ये द्वयं तत्र वदेद् बुधः ।
मुखे हानिफलं जयो दक्षे भ्रमः पादे स्त्रियो हृदि ।
वामे भीर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे ।
यस्य पीडाकरः सौरिस्तस्य चक्रे स्थितं फलम् ॥
शनिसञ्चारफलम् ॥ ० । * ।
धीराः प्रणम्य भवतो विनिवेदयामि
श्रीकामदेवधरणीतलवासवस्य ।
आज्ञामवाप्य रचितो रुचिरो निबन्धो
दोषो न मे बलवतीह यतो हि आज्ञा ॥

Colophon. इति रघुनाथशर्म्मभट्टाचार्य्यविरचिता सत्कृत्यमुक्तावली समाप्ता ॥०॥ लिखितेयं श्रीरघुनाथदेवशर्म्मणा शकाब्दा. १६८८ ॥

विवरणमनुक्तपूर्व्वम् ।

No. 139. सत्कृत्यमुक्तावली । Satkrityamuktāvalī Substance country made yellow paper, 12 x 6 inches. Folia, 83 Lines, 2–7 in a page. Character, Bengali Date, ? Appearance, not fresh. Verse. Not correct. Complete.

A third copy of the same work.

विवरणमनुक्तपूर्व्वम् ।

No. 140. सत्कृत्यमुक्तावली । Satkrityamuktāvalī. Substance, country made yellowish paper, 18 x 3 inches. Folia, 73 (of which foll. 2, 4, 5, and 6 are wanting). Lines, 5–6 in a page Character, Bengali. Date, ? Appearance, old. Verse Not correct. Incomplete.

The same work

विवरणमुक्तपूर्वम् ।

No. 141. सर्व्वविचारमाला । Sarvavicāramālā Substance, country-made colourless paper, 10 × 4 inches Folia, 18 Lines, 9 in a page Character, Nāgarī. Date, ? Appearance, very old, and worn out Verse Not correct Incomplete

A work on astrology, treating of the effects of planets and stars on human destiny, entitled Sarvavicaramalā Anonymous

Beginning. ओं नम सूर्याय।

आदित्यचन्द्रभौमबुधजीवशुक्रसौरा । एत ग्र मद्य । एषां दैवतानि ज्ञलवह्न वरुण षड़ानन केशव ब्रह्म शची प्रजापतिरेति। अधीपपद्या राहु केतुर्भूयोऽन्यद्येत सपपद्या । एषां दैवतानि गणपतौबद्री धर्म्मौ यमश।

End. नास्ति।

Colophon. नास्ति।

विवरणम्—यद्यादिसदपादिनिर्णयविषयको ज्योतिर्निबन्धविशेष ।

No. 142. सर्व्वार्थचिन्तामणि । Sarvarthacintamanih Substance, foolscap paper, 10 × 8 inches bound like a book Folia 118 Lines, 11 in a page Character, Nagarī Date ? Appearance, rather old and slightly worm-eaten throughout Verse Not correct Complete

A treatise on astrological calculations, by Venkatesa Śarman, son of Appaya Noticed by Dr R Mitra in his *Notices of* Sanskrit MSS, No 2870 See also the Catalogue of the India Office Library, No 3108, p 1109

Beginning. श्रीगणेशं भजे ॥

श्रीमच्छेषगिरिस्फटाधिनिलयं श्रीवेङ्कटेशं गुरु'

नत्वा वेङ्कटनायकं त्वनुदिनं जातोऽप्ययार्यात् सुधी ।

ज्योतिःशास्त्रमहाभिप्रायसमं वक्ष्यामि पीतामर्क
ज्योतिःशास्त्र + + विवेकविदुषां सर्व्वार्थचिन्तामणिम् ॥ १ ॥
श्रीमात्स्यदर्शिं देवं सन्नदयामि मनोरथम् ।
देवाः प्रणम्य यं सर्व्वे तं नमामि गजाननम् ॥ २ ॥
वाग्विभूतिप्रदा देवी या श्वेताम्बरधारिणी ।
श्रीक्षीरधवलाकारा स्वयं तिष्ठतु वाचि मे ॥ ३ ॥
